Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 1
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# नैय्यायिकानां दृशा सार्थकशब्दस्य सामान्यपरिचयः

V Sandhya
Research Scholar, Department of Research & Publications, National Sanskrit University, Tirupati, India

Article Info

Accepted : 20 Jan 2025
Published : 10 Feb 2025
**Publication Issue :**
January-February-2025
Volume 8, Issue 1
**Page Number :** 34-37

**सारांशः** – तत्तद्धर्मसाक्षात्कारवतः आप्तोपदेशः शब्द इति परमकारुणिकः महर्षिः गोतमः शब्दस्वरूपमवोचत्। उदयनाचार्यास्तु परिशुद्धौ न्यायसारसम्मतमेवानुवदति समयसामर्थ्यवशात् सम्यक् परोक्षानुभवसाधनं शब्द इति। वैशेषिकास्तु शब्दस्य पृथक्प्रमाणत्वं नाभ्युपगच्छन्ति, अपि च अनुमाने एव शब्दमन्तर्भावयन्ति। तत्त्वचिन्तामणिकारः गङ्गेशोपाध्यायःप्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम् इति वर्णयन्ति। विश्वनाथपञ्चाननस्तु पदज्ञानमेव शब्दप्रमाणमिति प्रत्यपादि। अनम्भट्टचार्येण आप्तवाक्यस्य शब्दत्वमुक्तम्। एतादृशः शब्दः नैयायिकानां नये किं विधः कति विधः इत्यादि विषयाः व्यासेऽस्मिन् विचार्यते।

**विशेषशब्दाः** – शक्तिधीः, ध्वन्यात्मको, सुपर्णा, शाब्दबोधप्रयोजकः, रूढं, लक्षकं, योगरूढं, यौगिकरूढम् इत्यादयः।

जगति स्वाभिप्रायानुसारेण परान् बोधयतुं वर्णात्मकशब्दमुच्चारयन्ति वक्तारः इति तु सर्वानुभवसिद्धः विषयः, वर्णात्मकशब्द एव भाषापदेन अभिधीयते। भाषयति प्रकाशयत्यर्थानिति व्युत्पत्तेः। तादृशबोधसाधने च निरुक्त शब्दमपेक्ष्य सुगमोपायो नाद्याप्याविष्कृतः केनापि। भारतीयतत्त्वचिन्तनायां दर्शनानामस्ति महत् स्थानम्। तत्रापि प्रमाणनां विषये अनेकानां मतवैमत्यं दरीदृश्यते। इतरप्रमाणसिद्धानामपि प्रमेयजातानां कालान्तरक्षमतया संरक्षणं शब्दप्रमाणेनैव साध्यते। अतः प्रमाणस्यास्य महद्वैशिष्ट्यमस्ति। तस्मादेव विषयोऽयं सुविस्तृतं व्याख्यातं निरूपितञ्च दृश्यते बहुषु शास्त्रेषु। शब्दे शाब्दे च नवीनाः भाषाशास्त्रज्ञाः नितरामौत्सुक्यं प्रदर्शयन्ति। अतः महानादरः विषयेऽस्मिन् वर्तत इति शाब्दबोधतत्त्वस्य गौरवं सूचयति।

प्रत्यक्षानुमानयोरगोचरानपि बहून् धर्माधर्मब्रह्मादीन् प्रतिपादयति शब्दो वैदिकः। अतः शब्दो बहुविषयः। वैदिकशब्दस्य प्रामाण्यव्यवस्थापनादियं प्रमाण्यविद्यास्थानेषु अग्रिमं स्थानमलङ्करोति। न्यायमञ्जर्यां न्यायविस्तरस्तु मूलस्तम्भूभूतः सर्वविद्यानाम्। वेदप्रमाण्यहेतुत्वात् इत्युक्तं दृश्यते। पदशास्त्रमिति प्रसिद्धं व्याकरणं, वाक्यशास्त्रमिति प्रसिद्धा मीमांसा, प्रमाणशास्त्रमिति प्रसिद्धो न्यायश्च मुख्यतया शाब्दबोधविषये सुविपुलां चर्चां कृतवन्तः। त्रिष्वपि शास्त्रेषु प्राचीनानामर्वाचीनानाञ्च विषयेऽस्मिन् मतभेदो दरीदृश्यते। परन्तु नव्यन्यायप्रादुर्भावादनन्तरमेव शाब्दविचारः महतीं अभिवृद्धिं प्रतिष्ठाञ्चोपजगाम इति निर्विवादांशः।

शब्दो हि ज्ञानजनकशब्दप्रयोगरूप व्यवहारस्य मूलकारणम्। स चासौ व्यवहारः शब्दार्थाभ्यां प्रवर्तते। व्यवहारकारणीभूतस्य वाक्तत्त्वस्य महत्वं प्रतिपादितं वैदिकसंहितासु यथा –“वाग्वै ब्रह्म”[1], “वागेव सुपर्णा”[2], “वाक् तु सरस्वती”[3] इत्येवमादिना।

कथितमपि भर्तृहरिणा –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमेव ज्ञानं सर्वं शब्देन भासते।**[4] इति

1.शतपथब्राह्मणे 2.1.4.10
2.शतपथब्राह्मणे 36.2.2.
3.ऐतरेयब्राह्मणे 3.1.

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

तादृश शब्दस्य प्रामाण्यम्, शब्दभेदांश्च यथामति किञ्चित् अस्मिन् पत्रे उपस्थाप्यते।

तत्तद्धर्मसाक्षात्कारवत: आप्तोपदेश: शब्द इति परमकारुणिक: महर्षि: गोतम: शब्दस्वरूपमवोचत्। लक्षणमिदं सर्वेषाम् आर्याणां म्लेच्छानां च समानमिति वात्सायन: न्यायभाष्ये अवादीत्। उदयनाचार्यास्तु परिशुद्धौ न्यायसारसम्मतमेवानुवदति समयसामर्थ्यवशात् सम्यक् परोक्षानुभवसाधनं शब्द इति। वैशेषिकास्तु शब्दस्य पृथक्प्रमाणत्वं नाभ्युपगच्छन्ति, अपि च अनुमाने एव शब्दमन्तर्भावयन्ति। तथा हि शब्दोऽनुमानं व्याप्तिबलेनार्थप्रतिपादकत्वात् धूमादिवदिति। अत: शब्द: न मानान्तरम् इति तेषाम् आशय:।

शिवादित्येनापि शब्द: अनुमानविषयत्वेन, व्याप्तिबलेन च शब्दोऽनुमानमेवेति समसाधि। तत्त्वचिन्तामणिकार: गङ्गेशोपाध्याय: शब्दलक्षणमेवं प्रत्यपादयत् – "प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्य: शब्द: प्रमाणम्"[5] इति। प्रकृतवाक्यार्थज्ञानप्रयुक्त: शब्द इति।

विश्वनाथपञ्चाननस्तु पदज्ञानमेव शब्दप्रमाणमिति, पदजन्यपदार्थस्मरणं व्यापार इति, शक्तिज्ञानं सहकारिकारणमिति तत: शाब्दबोधो जायते इति च निरूपयामास।

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधी:।**

**शाब्दबोध: फलं तत्र शक्तिधी: सहकारिणी।।**[6]

अनम्भट्टचार्येण आप्तवाक्यस्य शब्दत्वमुक्तम्। यथार्थवक्ता च तत्र आप्त:। एवञ्च नैयायिकानां नये शब्द: प्रमाणम्, आप्तोपदेशत्वं तस्य लक्षणमिति फलितम्। स च शब्द: नैयायिकानां नये द्विविध: ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको शब्द: साक्षादर्थप्रत्यायको न भवतीति स: निरर्थक:। यादृश: शब्द: शब्दान्तरं सहकृत्य स्वस्य स्वघटकस्य वा पदार्थोपस्थितिद्वारा शाब्दबोधप्रयोजक: स: तदाविधार्थे सार्थक:।

स च सार्थकशब्द: प्रकृति:, प्रत्यय:, निपात: इति त्रिविध:।

**शब्दान्तरमपेक्ष्यैव सार्थक: स्वार्थबोधकृत्।**

**प्रकृति: प्रत्ययश्चैव निपातश्चेति स त्रिधा।।** [7]

**प्रकृति:** –

**स्वेतरार्थानवच्छिन्नयत्स्वार्थस्यावबोधने।**

**यच्छब्दनिश्चये हेतु: प्रकृति: सा तदर्थिका।।**[8]

स्वेतरशब्दार्थाविशेषितस्य यादृशस्वार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरसंसर्गेण यादृशशब्दवत्तया निश्चय एव हेतुस्तादृशशब्दस्तथाविधार्थे प्रकृति:। यथा – पट, भू इत्यादयो शब्दा: स्वोत्तरविभक्त्याद्यंशे निश्चिता एव स्वोपस्थाप्यस्य वसनजननादेरन्वयं प्रत्ययार्थे कर्मत्वकर्तृत्वादौ बोधयन्ति न त्वन्यथा (अनिश्चिता अपि)।

अत्रेदं बोध्यम्। चैत्र: पचति, यजेत इत्यादौ शब्दान्तरधर्मिकसुबादि निश्चयस्यासत्त्वेपि तदर्थस्यैकवर्तमानत्वादेश्चैत्रपाकादावन्वयात् स्वाव्यवहितोत्तरत्वसंसर्गेण तादृशशब्दवत्ताया निश्चय एव तदुपस्थाप्य यादृशान्वयं प्रति हेतु: तादृशस्यैव च शब्दस्य प्रकृते तथाविध: स्वार्थ:। स च पाकेत्यादे: शक्त्यादिविरहेपि पचनादिरूप: सुवच एव। पचनादे: कर्मत्वादावन्वयबोधं प्रति अमादिधर्मिकतादृशशब्दवत्ताया निश्चयस्यैव हेतुत्वात् लक्षणसमन्वय:।

प्रकृति: नाम, धातुभेदेन द्विविधा। नामैव प्रातिपदिकमुच्यते। रूढलक्षकयोगरूढयौगिकरूढभेदात् चतुर्विधं नाम। परे तु यौगिकंरूढमधिकमन्तर्भाव्य नाम पञ्चविधमाहु:। रूढमेव संज्ञेत्युच्यते। सा च संज्ञा त्रिविधा नैमित्तिकी, पारिभाषिकी, औपाधिकी चेति। लक्षकं नाम च

---

4.वाक्यपदीयम् 1.123.

5.तत्त्वचिन्तामणी शब्दखण्ड:

6.कारिकावली .81.

7.श.श.प्र– श्लो.6.

8. श.श.प्र– श्लो.7.

जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकादिलक्षणाभेदेनानेकप्रकारम्। योगरूढं च सामासिकतद्धितभेदेन द्विविधम्। यौगिकं तु समासः, तद्धितान्तं, कृदन्तमिति त्रिविधम्। आत्मनेपद्यादिभेदेन धातुरपि त्रिविधः। इति प्रकृतिभेदः प्रदर्शितः।

**प्रत्ययस्तु-**

**यादृशार्थे प्रकृत्यन्यो निपातान्यश्च वृत्तिमान्।**

**स तादृशार्थे शब्दः स्यात्प्रत्ययोऽसौ चतुर्विधः।।**[9]

विभक्तिः, धात्वंशः, तद्धितः, कृदिति चतुर्विधः।

**विभक्तिः –**

**प्रकृत्यर्थस्य यः स्वार्थे विधेयत्वेन बोधने।**

**समर्थः सोऽथवा शब्दो विभक्तित्वेन गीयते।।**[10]

यः शब्दः स्वार्थे धर्मिणि स्वप्रकृत्यर्थविधेयकान्वयबोधं प्रति समर्थः सः सुबादिविभक्तिरित्युच्यते। यद्वा प्रत्ययार्थधर्मिकप्रकृत्यर्थविधेयकान्वयबोधसमर्थः शब्दो विभक्तिरिति।

**विभक्तिश्चैव धात्वंशस्तद्धितं कृदिति क्रमात्।**

**चतुर्धा प्रत्ययः प्रोक्तः, कादिभिः पञ्चधाऽथवा।।**[11]

विभक्तिस्तु सुप्तिङ्भेदेन द्विविधा।

**सुब्विभक्तिः**

**प्रकृत्यर्थे स्वार्थसङ्ख्यान्वयधीहेतवः सुपः।**

**प्रथमादिप्रभेदेन ताश्च सप्तविधा मताः।।**[12]

प्रकृत्यर्थधर्मिकस्वार्थसङ्ख्यान्वयबोधिका विभक्तयः सुप उच्यन्ते।

सुब्विभक्तिः प्रथमादि भेदेन सप्तधा। सा पुनर्द्विविधा कारकतदितरार्था चेति। कारकेतरार्था विभक्तिः उपपदविभक्तिरित्युच्यते।

**तिङ्विभक्तिः**

तिङ्विभक्तिस्तु लडादि भेदेन दशविधा। धात्वंशस्तु नामप्रकृतिकः धातुप्रकृतिकश्चेति द्विविधः। तद्धितस्तु अपत्याद्यर्थभेदेन बहुविधः इति प्रत्ययविभागः कृतः।

**निपातः**

निपातस्वरूपन्तु एवं लक्षितवान् जगदीशः

**स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः।**

**सुबाद्यन्यो निपाताऽसौ विविधश्चादिभेदतः।।**[13]

तदर्थश्च – यः शब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थे निपातः। सुबाद्यात्मकप्रत्यये निपातलक्षणस्यातिव्याप्तिवारणाय निपातलक्षणे सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नत्वं निवेश्यम्। तथा च यादृशानुपूर्वीप्रकारकनिश्चयत्वं स्वेतरशब्दवृत्तित्वज्ञानजन्य

---

9. श.श.प्र- श्लो.9.
10. श.श.प्र- श्लो.62.
11. श.श.प्र- श्लो.60.
12. श.श.प्र- श्लो.60.
13. श.श.प्र- श्लो.63.

उपस्थितिप्रयोज्यावच्छेदकत्वनिरूपितस्ववृत्तिज्ञानजन्योपस्थितिप्रयोज्ययादृशार्थविशेष्यतानिरूपिततादात्म्यसम्बन्धाच्छिन्नप्रकारताशालिशाब्दत्वव्यापकजन्यतानिरूपितजनकतावच्छेदकमेवम्भूतं यद्यत् स्वं, तादृशार्थकतत्तदन्यत्वे सति सुबादिभिन्नत्वे च सति तदर्थसार्थकत्वं तादृशार्थकनिपातत्वमिति पर्यवसितम्।

निपातलक्षणे सार्थकत्वस्य प्रविष्टत्वात् शप् – श्यनादि – विकरणप्रत्ययादौ तादृशसुबादिभिन्नत्वस्य निवेशत्वेऽपि नातिव्याप्तिः। स्मृतः समुच्चयः इत्यादिस्थलीयतादृशानुपूर्वी समुच्चयपदेन गृहीतं भवेत्। तादृशानुपूर्वीविशिष्टभिन्नत्वस्यापि चवेत्यादि निपातेऽवश्यम्भावित्वम्। तथा च चादिनिपाताः स्वकीयार्थसमुच्चयादि विशेष्यत्वेन सङ्गृह्य न कस्यापि नामार्थनिष्ठभेदसंसर्गावच्छिन्नप्रकारताशालिशाब्दबुद्धित्वावच्छिन्नं प्रति समर्थाः भवन्ति। स्मृतमनुभूतञ्च, इत्यादिवाक्याद् अभेदसम्बन्धेन स्मृतः समुच्चय इत्याकारकान्वयबोधो न कस्यापि भवति। अपि च तादृशनिपातघटितवाक्यस्थले स्मृतानुभूतविषयकसमुच्चय इत्याकारकबोधो भवति। अर्थात् समुदायं विषयत्वेनाभ्युपेत्य अन्वयबोधो भवति । तस्मात् चादिनिपाते लक्षणसम्न्वयः।

इत्थं च नैयायिकैः प्रतिपादितशब्दप्रमाण, शब्दभेदादिकं च यथामति निरूपितमत्र।

**उपयुक्तग्रन्थसूची**


1. न्यायभाष्यम्, वात्सायनमुनिप्रणीतम्, बोद्धभारती, वाराणसी, 1998.
2. तत्त्वचिन्तामणिः, श्रीमद्गङ्गेशोपाध्यायविरचितः, शब्दखण्डः, चौखम्बासंस्कृतप्रतिष्ठान्, दिल्ली, 1990.
3. तर्कसङ्ग्रहः, अन्नभट्टविरचितः, (काशीसंस्कृतग्रन्थमाला सं – 187) वाराणसी, 1969.
4. कारिकावली (मुक्तावलीसहिता) श्रीविश्वनाथतर्कपञ्चाननकृता,सम्पादकः श्री सि.शङ्कररामशास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं – 29) चौखम्बासंस्कृतप्रतिष्टान्, दिल्ली, 1988.
5. शब्दशक्तिप्रकाशिका, जगदीशतर्कालङ्काररचिता, संपा. ढुणढिराजशास्त्री, (काशीसंस्कृतसिरीस् सं.119), वाराणसी, 2002.